# गणेश स्तोत्राणि

***(Various stotrams on Lord Ganeśa)***

***Compiled and typeset***
***using LaTeX 2ε , pdfLaTeX, and dvng Type I fonts***

**©July 2002**

**Contents**


| | | |
|---|---|---|
| 1 | gaṇeśa pañcaratnam | 2 |
| 2 | gaṇāṣṭakam | 5 |
| 3 | saṅkaṭanāśana gaṇeśa stotram | 7 |
| 4 | ṛṇavimocana gaṇeśastotram | 9 |
| 5 | gaṇeśa bhujaṅgam | 11 |
| 6 | gaṇeśāṣṭakam | 14 |

## 1 gaṇeśa pañcaratnam

# गणेश पञ्चरत्नम्

मुदा करात्तमोदकं सदा विमुक्तिसाधकं
कलाधरावतंसकं विलासिलोकरक्षकम् ।
अनायकैकनायकं विनाशितेभदैत्यकं
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरं
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरं
दरेतरोदरं वरं वरेभवक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनं
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम् ।
प्रपञ्चनाशभीषणं धनञ्जयादिभूषणं
कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजं
अचिन्त्यरूपमन्तहीनमन्तराय कृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तमेव योगिनां
तमेकदन्तमेव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

। फल श्रुती ।

महागणेशपञ्चरत्नमादरेण योऽन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतां अदोषतां सुसाहितीं सुपुत्रतां
समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात् ॥

इति श्रीशङ्कराचार्यविरचितं
गणेशपञ्चरत्नं संपूर्णम्

## 2 gaṇāṣṭakam

# गणाष्टकम्

एकदन्तं महाकायं तप्तकाञ्चनसन्निभं ।
लम्बोदरं विशालाक्षं वन्देऽहं गननायकम् ॥ १ ॥

मौञ्जीकृष्णाजिनधरं नागयज्ञोपवीतिनं ।
बालेन्दुविलसन्मौलिं वन्देऽहं गननायकम् ॥ २ ॥

अम्बिकाहृदयानन्दं मातृभिः परिपालितं ।
भक्तप्रियं मदोन्मत्तं वन्देऽहं गणनायकम् ॥ ३ ॥

चित्ररत्नविचित्राङ्गं चित्रमालाविभूषितं ।
चित्ररूपधरं देवं वन्देऽहं गणनायकम् ॥ ४ ॥

गजवक्त्रं सुरश्रेष्टं कर्णचामरभूषितं ।
पाशाङ्कुशधरं देवं वन्देऽहं गणनायकम् ॥ ५ ॥

मूषिकोत्तममारुह्य देवासुरमहाहवे ।
योद्धुकामं महावीर्यं वन्देऽहं गणनायकम् ॥ ६ ॥

यक्षकिन्नरगन्धर्वसिद्धविद्याधरैस्सदा ।
स्तूयमानं महात्मानं वन्देऽहं गणनायकम् । । ७ ॥

सर्वविघ्नहरं देवं सर्वविघ्नविवर्जितं ।
सर्वसिद्धिप्रदातारं वन्देऽहं गणनायकम् ॥ ८ ॥

गणाष्टकमिदं पुण्यं भक्तितो यः पठेन्नतः ।
विमुक्तस्सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥ ९ ॥

॥ इति गणाष्टकं संपूर्ण ॥

## 3 saṅkaṭanāśana gaṇeśa stotram

# सङ्कटनाशन गणेश स्तोत्रम्

श्रीगणेशाय नमः ।नारद उवाच ।

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तावासं स्मरेन्नित्यं आयुःकामार्थसिद्धये ॥१ ॥

प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।
तृतीयं कृष्णपिङ्गाक्षं गजवक्त्रं चतुर्थकम् ॥२ ॥

लम्बोदरं पञ्चमं च षष्ठं विकटमेव च ।
सप्तमं विघ्नराजेन्द्रं धूम्रवर्णं तथाष्टमम् ॥३ ॥

नवमं फालचन्द्रं च दशमं तु विनायकम् ।
एकादशं गणपतिं द्वादशं तु गजाननम् ॥४ ॥

द्वादशैतानि नामानि त्रिसण्ध्यं यः पठेन्नरः ।
न च विघ्नभयं तस्य सर्वसिद्धिकरं प्रभोः ॥५ ॥

विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
पुत्रार्थी लभते पुत्रान् मोक्षार्थी लभते गतिम् ॥ ६ ॥

जपेद्गणपतिस्तोत्रं षड्भिर्मासैः फलं लभेत् ।
संवत्सरेण सिद्धिं च लभते नात्र संशयः ॥ ७ ॥

अष्टेभ्यो ब्राह्मणेभ्यश्च लिखित्वा यः समर्पयेत् ।
तस्य विद्या भवेत्सर्वा गणेशस्य प्रसादतः ॥ ८ ॥

॥ इति नारदपुराणे सङ्कष्टनाशनं नाम
गणेशस्तोत्रं संपूर्णम् ॥

## 4 ṙṇavimocana gaṇeśastotram

# ऋणविमोचन गणेशस्तोत्रम्

सिन्दूरवर्णं द्विभुजं गणेशं
लम्बोदरं पद्मदळे निविष्टम् ।
ब्रह्मादिदेवैः परिसेव्यमानं
सिद्धैर्युतं तं प्रणमामि देवम् ॥

सृष्ट्यादौ ब्रह्मणा सम्यक् पूजितः फलसिद्धये ।
सदैव पार्वतीपुत्रः ऋणनाशं करोतु मे ॥ १ ॥

त्रिपुरस्य वधात् पूर्वं शम्भुना सम्यगर्चितः ।
सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ २ ॥

हिरण्यकश्यप्वादीनां वधार्थे विष्णुनार्चितः ।
सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ३ ॥

महिषस्य वधे देव्या गणनाथः प्रपूजितः ।
सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ४ ॥

तारकस्य वधात्पूर्वं कुमारेण प्रपूजितः ।

सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ५ ॥

भास्करेण गणेशो हि पूजितश्छविसिद्धये ।
सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ६ ॥

शशिना कान्तिवृध्यर्थं पूजितो गणनायकः । सदैव
पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ७ ॥

पालनाय च तपसां विश्वामित्रेण पूजितः ।
सदैव पर्वतीपुत्रः ऋणनाशं करोतु मे ॥ ८ ॥

इदं ऋणहरस्तोत्रं तीव्रदारिद्र्यनाशनं ।
एकवारं पठेन्नित्यं वर्षमेकं समाहितः ।
दरिद्र्यं दारुणम् त्यक्त्वा कुबेरसमतां व्रजेत् ॥ ९ ॥

॥ इति कृष्णयमाळतन्त्रे उमामहेश्वरसंवादे
ऋन्हरण गणेशस्तोत्रम् ॥

✠✠✠✠✠✠✠✠✠✠✠✠

## 5 gaṇeśa bhujaṅgam

# गणेश भुजङ्गम्

रणत्क्षुद्रघण्टानिनादाभिरामं
चलत्ताण्डवोद्दण्डवत्पद्मतालम् ।
लसत्तुन्दिलाङ्गोपरिव्यालहारं
गणाधीशमीशानसूनुं तमीडे ॥ १ ॥

ध्वनिध्वंसवीणालयोल्लासिवक्त्रं
स्फुरच्छुण्डदण्डोल्लसद्बीजपूरम्
गलद्दर्पसौगन्ध्यलोलालिमालं
गणाधीशमीशानसूनुं तमीडे ॥ २ ॥

प्रकाशज्जपारक्तरत्नप्रसून-
प्रवालप्रभातारुणज्योतिरेकम् ।
प्रलम्बोदरं वक्रतुण्डैकदन्तं
गणाधीशमीशानसूनुं तमीडे ॥ ३ ॥

विचित्रस्फुरद्रत्नमालाकिरीटं
किरीटोल्लसच्चन्द्ररेखाविभूषम् ।
विभूषैकभूषं भवध्वंसहेतुं
गणाधीशमीशानसूनुं तमीडे ॥ ४ ॥

उदञ्चद्भुजावल्लरीदृश्यमूलो-
च्चलद्भ्रूलताविभ्रमभ्राजदक्षम् ।
मरुत्सुन्दरीचामरैः सेव्यमानं
गणाधीशमीशानसूनुं तमीडे ॥ ५ ॥

स्फुरन्निष्ठुरालोलपिङ्गाक्षितारं
कृपाकोमलोदाररलीलावतारम् ।
कलाबिन्दुगं गीयते योगिवर्यै-
र्गणाधीशमीशानसूनुं तमीडे ॥ ६ ॥

यमेकाक्षरं निर्मलं निर्विकल्पं
गुणातीतमानन्दमाकारशून्यम् ।
परं पारमोंकारमाम्नायगर्भं
वदन्ति प्रगल्भं पुराणं तमीडे ॥ ७ ॥

चिदानन्दसान्द्राय शान्ताय तुभ्यं
नमो विश्वकर्त्रे च हर्त्रे च तुभ्यम् ।
नमोऽनन्तलीलाय कैवल्यभासे
नमो विश्वबीज प्रसीदेशसूनो ॥ ८ ॥

इमं सुस्तवं प्रातरुत्थाय भक्त्या
पठेद्यस्तु मर्त्यो लभेत्सर्वकामान् ।
गणेशप्रसादेन सिध्यन्ति वाचो
गणेशे विभौ दुर्लभं किं प्रसन्ने ॥ ९ ॥

## 6 gaṇeśāṣṭakam

# गणेशाष्टकम्

॥ सर्वे ऊचुः ॥

यतोऽनन्तशक्तेरनन्ताःस्चजीवा
यतो निर्गुणदप्रमेया गुणास्ते ।
यतो भाति सर्वं त्रिधा भेदभिन्नं
सदा तं गणेशं नमामो भजामः ॥ १ ॥

यतश्चाविरासीज्जगत्सर्वमेत-
त्त्थाब्जासनो विश्वगो विश्वगोप्ता ।
तथेन्द्रादयो देवसंघा मनुष्याः
सदा तं गणेशं नमामो भजामः ॥ २ ॥

यतो वह्निभनू भवो भूर्जलं च
यतः सागराश्चन्द्रमा व्योम वायुः ।
यतः स्थावरा जंगमा वृक्षसंघाः
सदा तं गणेशं नमामो भजामः ॥ ३ ॥

यतो दानवाः किन्नरा यक्षसंघा
यतश्चारणा वारणाः श्वापदश्च ।
यतः पक्षिकीटा यतो वीरुधश्च
सदा तं गणेशं नमामो भजामः ॥ ४ ॥

यतो बुद्धिरज्ञाननाशो मुमुक्षो-
र्यतः संपदो भक्तिसंतोषिकाः स्युः ।
यतो विघ्ननाशो यतः कार्यसिद्धिः
सदा तं गणेशं नमामो भजामः ॥ ५ ॥

यतः पुत्रसंपद्यतो वाञ्छितार्थो
यतोऽभक्तविघ्नास्तथाऽनेकरूपः ।
यतः शोकमोहौ यतः काम एव
सदा तं गणेशं नमामो भजामः ॥ ६ ॥

यतोऽनन्तशक्तिः स शेषो बभूव
धराधारणेऽनेकरूपे च शक्तः ।
यतोऽनेकधा स्वर्गलोका हि नाना
सदा तं गणेशं नमामो भजामः ॥ ७ ॥

यतो वेदवाचो विकुण्ठा मनोभिः
सदा नेति नेतीति यत्ता गृणन्ति ।
परब्रह्मरूपं चिदानन्तभूतं
सदा तं गणेशं नमामो भजामः ॥ ८ ॥

॥ श्रीगणेश उवाच ॥

पुनरूचे गणादीशः स्तोत्रमेतत्पठेन्नरः ।
त्रिसन्ध्यं त्रिदिनं तस्य सर्वं कार्यं भविष्यति ॥ ९ ॥

यो जपेदष्टदिवसं श्लोकाष्टकमिदं शुभं ।
अष्टवारं चतुर्थ्यां तु सोऽष्टसिद्धीरवाप्नुयात् ॥ १० ॥

यः पठेन्मासमात्रं तु दशवारं दिने दिने ।
स मोचयेद्बंधगतण्म् राजवध्यं न सँम्शयः ॥ ११ ।

विद्याकामो लभेद्विद्यां पुत्रार्थी पुत्रमाप्नुयात् ।
वाञ्छितांल्लभते सर्वानेकविम्शतिवारतः ॥ १२ ॥

यो जपेत्परया भक्त्या गजाननपरो नरः ।
एवमुक्त्वा ततो देवश्चान्तर्धानं गतः प्रभुः ॥ १३ ॥

॥ इति श्रीगणेशपुराणे उपासनाखण्डे

श्रीगणेशाष्टकं संपूर्णम् ॥